# Shri Surya Sahasranama Stotram 1

# શ્રીસૂર્યસહસ્રનામસ્તોત્રમ્ ૧ ભવિષ્યપુરાણાન્તર્ગતા

## Document Information

Text title : Shri Surya Sahasranama Stotram 1

File name : suuryasahasraBhaviShya.itx

Category : sahasranAma, navagraha, stotra

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : Kirk Wortman kirkwort at hotmail.com, PSA Easwaran

Proofread by : Kirk Wortman kirkwort at hotmail.com, PSA Easwaran

Description-comments : From bhaviShyapuraNa referenced in Gita press version. Shaktapramoda has variations. See corresponding nAmAvalI.

Latest update : January 31, 2003, January 5, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 7, 2020

*sanskritdocuments.org*

# શ્રીસૂર્યસહસ્રનામસ્તોત્રમ્ ૧ ભવિષ્યપુરાણાન્તર્ગતા

સુમન્તુરુવાચ
માઘે માસિ સિતે પક્ષે સપ્તમ્યાઙ્કુરુનન્દન ।
નિરાહારો રવિમ્ભક્ત્યા પૂજયેદ્વિધિના નૃપ ॥ ૧॥

પૂર્વોક્તેન જપેજ્જપ્યન્દેવસ્ય પુરતઃ સ્થિતઃ ।
શુદ્ધૈકાગ્રમના રાજઞ્જિતક્રોધો જિતેન્દ્રિયઃ ॥ ૨॥

શતાનીક ઉવાચ
કેન મન્ત્રેણ જપ્તેન દર્શનં ભગવાન્વ્રજેત્ ।
સ્તોત્રેણ વાપિ સવિતા તન્મે કથય સુવ્રત ॥ ૩॥

સુમન્તુરુવાચ
સ્તુતો નામસહસ્રેણ યદા ભક્તિમતા મયા ।
તદા મે દર્શનં યાતઃ સાક્ષાદ્ દેવો દિવાકરઃ ॥ ૪॥

શતાનીક ઉવાચ -
નામ્નાં સહસ્રં સવિતુઃ શ્રોતુમિચ્છામિ હે દ્વિજ ।
યેન તે દર્શનં યાતઃ સાક્ષાદ્દેવો દિવાકરઃ ॥ ૧॥

સર્વમઙ્ગલમઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ।
સ્તોત્રમેતન્મહાપુણ્યં સર્વોપદ્રવનાશનમ્ ॥ ૨॥

ન તદસ્તિ ભયં કિઞ્ચિદ્યદનેન ન નશ્યતિ ।
જ્વરાદ્યૈર્મુચ્યતે રાજન્ સ્તોત્રેઽસ્મિન્ પઠિતે નરઃ ॥ ૩॥

અન્યે ચ રોગાઃ શામ્યન્તિ પઠતઃ શ‍ૃણ્વતસ્તથા ।
સમ્પદ્યન્તે યથા કામાઃ સર્વ એવ યથેપ્સિતાઃ ॥ ૪॥

ય એતદાદિતઃ શ્રુત્વા સઙ્ગ્રામં પ્રવિશેન્નરઃ ।
સ જિત્વા સમરે શત્રૂનભ્યેતિ ગૃહમક્ષતઃ ॥ ૫॥

વન્ધ્યાનાં પુત્રજનનં ભીતાનાં ભયનાશનમ્ ।
ભૂતિકારિ દરિદ્રાણાં કુષ્ઠિનાં પરમૌષધમ્ ॥ ૬॥

બાલાનાં ચૈવ સર્વેષાં ગ્રહરક્ષોનિવારણમ્ ।
પઠતે સંયતો રાજન્ સ શ્રેયઃ પરમાપ્નુયાત્ ॥ ૭॥

સ સિદ્ધઃ સર્વસઙ્કલ્પઃ સુખમત્યન્તમશ્નુતે ।
ધર્માર્થિભિર્ધર્મલુબ્ધૈઃ સુખાય ચ સુખાર્થિભિઃ ॥ ૮॥

રાજ્યાય રાજ્યકામૈશ્ચ પઠિતવ્યમિદં નરૈઃ ।
વિદ્યાવહં તુ વિપ્રાણાં ક્ષત્રિયાણાં જયાવહમ્ ॥ ૯॥

પશ્વાવહં તુ વૈશ્યાનાં શૂદ્રાણાં ધર્મવર્ધનમ્ ।
પઠતાં શ◌ૃણ્વતામેતદ્ભવતીતિ ન સંશયઃ ॥ ૧૦॥

તચ્છૃણુષ્વ નૃપશ્રેષ્ઠ પ્રયતાત્મા બ્રવીમિ તે ।
નામ્નાં સહસ્રં વિખ્યાતં દેવદેવસ્ય ધીમતઃ ॥ ૧૧॥

ધ્યાનમ્ -
ધ્યેયઃ સદા સવિતૃમણ્ડલમધ્યવર્તી
    નારાયણઃ સરસિજાસનસન્નિવિષ્ટઃ ।
કેયૂરવાન્ મકરકુણ્ડલવાન્ કિરીટી
    હારી હિરણ્મયવપુર્ધૃતશઙ્ખચક્રઃ ॥

અથ સ્તોત્રમ્ -
ૐ વિશ્વવિદ્વિશ્વજિત્કર્તા વિશ્વાત્મા વિશ્વતોમુખઃ ।
વિશ્વેશ્વરો વિશ્વયોનિર્નિયતાત્મા જિતેન્દ્રિયઃ ॥ ૧॥

કાલાશ્રયઃ કાલકર્તા કાલહા કાલનાશનઃ ।
મહાયોગી મહાસિદ્ધિર્મહાત્મા સુમહાબલઃ ॥ ૨॥

પ્રભુર્વિભુર્ભૂતનાથો ભૂતાત્મા ભુવનેશ્વરઃ ।
ભૂતભવ્યો ભાવિતાત્મા ભૂતાન્તઃકરણં શિવઃ ॥ ૩॥

શરણ્યઃ કમલાનન્દો નન્દનો નન્દવર્ધનઃ ।
વરેણ્યો વરદો યોગી સુસંયુક્તઃ પ્રકાશકઃ ॥ ૪॥

પ્રાપ્તયાનઃ પરપ્રાણઃ પૂતાત્મા પ્રયતઃ પ્રિયઃ ।
નયઃ સહસ્રપાત્ સાધુર્દિવ્યકુણ્ડલમણ્ડિતઃ ॥ ૫॥

અવ્યઙ્ગધારી ધીરાત્મા સવિતા વાયુવાહનઃ ।
સમાહિતમતિર્દાતા વિધાતા કૃતમઙ્ગલઃ ॥ ૬॥

કપર્દી કલ્પપાદ્રુદ્રઃ સુમના ધર્મવત્સલઃ ।
સમાયુક્તો વિમુક્તાત્મા કૃતાત્મા કૃતિનાં વરઃ ॥ ૭॥

અવિચિન્ત્યવપુઃ શ્રેષ્ઠો મહાયોગી મહેશ્વરઃ ।
કાન્તઃ કામારિરાદિત્યો નિયતાત્મા નિરાકુલઃ ॥ ૮॥

કામઃ કારુણિકઃ કર્તા કમલાકરબોધનઃ ।
સપ્તસપ્તિરચિન્ત્યાત્મા મહાકારુણિકોત્તમઃ ॥ ૯॥

સઞ્જીવનો જીવનાથો જયો જીવો જગત્પતિઃ ।
અયુક્તો વિશ્વનિલયઃ સંવિભાગી વૃષધ્વજઃ ॥ ૧૦॥

વૃષાકપિઃ કલ્પકર્તા કલ્પાન્તકરણો રવિઃ ।
એકચક્રરથો મૌની સુરથો રથિનાં વરઃ ॥ ૧૧॥

સક્રોધનો રશ્મિમાલી તેજોરાશિર્વિભાવસુઃ ।
દિવ્યકૃદ્દિનકૃદ્દેવો દેવદેવો દિવસ્પતિઃ ॥ ૧૨॥

દીનનાથો હરો હોતા દિવ્યબાહુર્દિવાકરઃ ।
યજ્ઞો યજ્ઞપતિઃ પૂષા સ્વર્ણરેતાઃ પરાવરઃ ॥ ૧૩॥

પરાપરજ્ઞસ્તરણિરંશુમાલી મનોહરઃ ।
પ્રાજ્ઞઃ પ્રાજ્ઞપતિઃ સૂર્યઃ સવિતા વિષ્ણુરંશુમાન્ ॥ ૧૪॥

સદાગતિર્ગન્ધવહો વિહિતો વિધિરાશુગઃ ।
પતઙ્ગઃ પતગઃ સ્થાણુર્વિહઙ્ગો વિહગો વરઃ ॥ ૧૫॥

હર્યશ્વો હરિતાશ્વશ્ચ હરિદશ્વો જગત્પ્રિયઃ ।
ત્ર્યમ્બકઃ સર્વદમનો ભાવિતાત્મા ભિષગ્વરઃ ॥ ૧૬॥

આલોકકૃલ્લોકનાથો લોકાલોકનમસ્કૃતઃ ।
કાલઃ કલ્પાન્તકો વહ્નિસ્તપનઃ સંપ્રતાપનઃ ॥ ૧૭॥

વિરોચનો વિરૂપાક્ષઃ સહસ્રાક્ષઃ પુરન્દરઃ ।
સહસ્રરશ્મિર્મિહિરો વિવિધામ્બરભૂષણઃ ॥ ૧૮॥

ખગઃ પ્રતર્દનો ધન્યો હયગો વાગ્વિશારદઃ ।
શ્રીમાનશિશિરો વાગ્મી શ્રીપતિઃ શ્રીનિકેતનઃ ॥ ૧૯॥

શ્રીકણ્ઠઃ શ્રીધરઃ શ્રીમાન્ શ્રીનિવાસો વસુપ્રદઃ ।
કામચારી મહામાયો મહોગ્રોઽવિદિતામયઃ ॥ ૨૦॥

તીર્થક્રિયાવાન્ સુનયો વિભક્તો ભક્તવત્સલઃ ।
કીર્તિઃ કીર્તિકરો નિત્યઃ કુણ્ડલી કવચી રથી ॥ ૨૧॥

હિરણ્યરેતાઃ સપ્તાશ્વઃ પ્રયતાત્મા પરન્તપઃ ।
બુદ્ધિમાનમરશ્રેષ્ઠો રોચિષ્ણુઃ પાકશાસનઃ ॥ ૨૨॥

સમુદ્રો ધનદો ધાતા માન્ધાતા કશ્મલાપહઃ ।
તમોઘ્નો ધ્વાન્તહા વહ્નિર્હોતાઽન્તઃકરણો ગુહઃ ॥ ૨૩॥

પશુમાન્ પ્રયતાનન્દો ભૂતેશઃ શ્રીમતાં વરઃ ।
નિત્યોઽદિતો નિત્યરથઃ સુરેશઃ સુરપૂજિતઃ ॥ ૨૪॥

અજિતો વિજિતો જેતા જઙ્ગમસ્થાવરાત્મકઃ ।
જીવાનન્દો નિત્યગામી વિજેતા વિજયપ્રદઃ ॥ ૨૫॥

પર્જન્યોઽગ્નિઃ સ્થિતિઃ સ્થેયઃ સ્થવિરોઽથ નિરઞ્જનઃ ।
પ્રદ્યોતનો રથારૂઢઃ સર્વલોકપ્રકાશકઃ ॥ ૨૬॥

ધ્રુવો મેષી મહાવીર્યો હંસઃ સંસારતારકઃ ।
સૃષ્ટિકર્તા ક્રિયાહેતુર્માર્તણ્ડો મરુતાં પતિઃ ॥ ૨૭॥

મરુત્વાન્ દહનસ્ત્વષ્ટા ભગો ભર્ગોઽર્યમા કપિઃ ।
વરુણેશો જગન્નાથઃ કૃતકૃત્યઃ સુલોચનઃ ॥ ૨૮॥

વિવસ્વાન્ ભાનુમાન્ કાર્યઃ કારણસ્તેજસાં નિધિઃ ।
અસઙ્ગગામી તિગ્માંશુર્ધર્માંશુર્દીપ્તદીધિતિઃ ॥ ૨૯॥

સહસ્રદીધિતિર્બ્રધ્નઃ સહસ્રાંશુર્દિવાકરઃ ।
ગભસ્તિમાન્ દીધિતિમાન્ સ્રગ્વી મણિકુલદ્યુતિઃ ॥ ૩૦॥

ભાસ્કરઃ સુરકાર્યજ્ઞઃ સર્વજ્ઞસ્તીક્ષ્ણદીધિતિઃ ।
સુરજ્યેષ્ઠઃ સુરપતિર્બહુજ્ઞો વચસાં પતિઃ ॥ ૩૧॥

તેજોનિધિર્બૃહત્તેજા બૃહત્કીર્તિર્બૃહસ્પતિઃ ।
અહિમાનૂર્જિતો ધીમાનામુક્તઃ કીર્તિવર્ધનઃ ॥ ૩૨॥

મહાવૈદ્યો ગણપતિર્ધનેશો ગણનાયકઃ ।

તીવ્રપ્રતાપનસ્તાપી તાપનો વિશ્વતાપનઃ ॥ ૩૩॥

કાર્તસ્વરો હૃષીકેશઃ પદ્માનન્દોઽતિનન્દિતઃ ।
પદ્મનાભોઽમૃતાહારઃ સ્થિતિમાન્ કેતુમાન્ નભઃ ॥ ૩૪॥

અનાદ્યન્તોઽચ્યુતો વિશ્વો વિશ્વામિત્રો ઘૃણિર્વિરાટ્ ।
આમુક્તકવચો વાગ્મી કઞ્ચુકી વિશ્વભાવનઃ ॥ ૩૫॥

અનિમિત્તગતિઃ શ્રેષ્ઠઃ શરણ્યઃ સર્વતોમુખઃ ।
વિગાહી વેણુરસહઃ સમાયુક્તઃ સમાક્રતુઃ ॥ ૩૬॥

ધર્મકેતુર્ધર્મરતિઃ સંહર્તા સંયમો યમઃ ।
પ્રણતાર્તિહરો વાયુઃ સિદ્ધકાર્યો જનેશ્વરઃ ॥ ૩૭॥

નભો વિગાહનઃ સત્યઃ સવિતાત્મા મનોહરઃ ।
હારી હરિર્હરો વાયુરૃતુઃ કાલાનલદ્યુતિઃ ॥ ૩૮॥

સુખસેવ્યો મહાતેજા જગતામેકકારણમ્ ।
મહેન્દ્રો વિષ્ટુતઃ સ્તોત્રં સ્તુતિહેતુઃ પ્રભાકરઃ ॥ ૩૯॥

સહસ્રકર આયુષ્માન્ અરોષઃ સુખદઃ સુખી ।
વ્યાધિહા સુખદઃ સૌખ્યં કલ્યાણઃ કલતાં વરઃ ॥ ૪૦॥

આરોગ્યકારણં સિદ્ધિરૃદ્ધિર્વૃદ્ધિર્બૃહસ્પતિઃ ।
હિરણ્યરેતા આરોગ્યં વિદ્વાન્ બ્રધ્નો બુધો મહાન્ ॥ ૪૧॥

પ્રાણવાન્ ધૃતિમાન્ ઘર્મો ઘર્મકર્તા રુચિપ્રદઃ ।
સર્વપ્રિયઃ સર્વસહઃ સર્વશત્રુવિનાશનઃ ॥ ૪૨॥

પ્રાંશુર્વિદ્યોતનો દ્યોતઃ સહસ્રકિરણઃ કૃતી ।
કેયૂરી ભૂષણોદ્ભાસી ભાસિતો ભાસનોઽનલઃ ॥ ૪૩॥

શરણ્યાર્તિહરો હોતા ખદ્યોતઃ ખગસત્તમઃ ।
સર્વદ્યોતો ભવદ્યોતઃ સર્વદ્યુતિકરો મતઃ ॥ ૪૪॥

કલ્યાણઃ કલ્યાણકરઃ કલ્યઃ કલ્યકરઃ કવિઃ ।
કલ્યાણકૃત્ કલ્યવપુઃ સર્વકલ્યાણભાજનમ્ ॥ ૪૫॥

શાન્તિપ્રિયઃ પ્રસન્નાત્મા પ્રશાન્તઃ પ્રશમપ્રિયઃ ।
ઉદારકર્મા સુનયઃ સુવર્ચા વર્ચસોજ્જ્વલઃ ॥ ૪૬॥

વર્ચસ્વી વર્ચસામીશસ્ત્રૈલોક્યેશો વશાનુગઃ ।
તેજસ્વી સુયશા વર્ષ્મી વર્ણાધ્યક્ષો બલિપ્રિયઃ ॥ ૪૭॥

યશસ્વી તેજોનિલયસ્તેજસ્વી પ્રકૃતિસ્થિતઃ ।
આકાશગઃ શીઘ્રગતિરાશુગો ગતિમાન્ ખગઃ ॥ ૪૮॥

ગોપતિર્ગ્રહદેવેશો ગોમાનેકઃ પ્રભઞ્જનઃ ।
જનિતા પ્રજનો જીવો દીપઃ સર્વપ્રકાશકઃ ॥ ૪૯॥

સર્વસાક્ષી યોગનિત્યો નભસ્વાનસુરાન્તકઃ ।
રક્ષોઘ્નો વિઘ્નશમનઃ કિરીટી સુમનઃપ્રિયઃ ॥ ૫૦॥

મરીચિમાલી સુમતિઃ કૃતાભિખ્યવિશેષકઃ ।
શિષ્ટાચારઃ શુભાકારઃ સ્વચારાચારતત્પરઃ ॥ ૫૧॥

મન્દારો માઠરો વેણુઃ ક્ષુધાપઃ ક્ષ્માપતિર્ગુરુઃ ।
સુવિશિષ્ટો વિશિષ્ટાત્મા વિધેયો જ્ઞાનશોભનઃ ॥ ૫૨॥

મહાશ્વેતઃ પ્રિયો જ્ઞેયઃ સામગો મોક્ષદાયકઃ ।
સર્વવેદપ્રગીતાત્મા સર્વવેદલયો મહાન્ ॥ ૫૩॥

વેદમૂર્તિશ્ચતુર્વેદો વેદભૃદ્વેદપારગઃ ।
ક્રિયાવાનસિતો જિષ્ણુર્વરીયાંશુર્વરપ્રદઃ ॥ ૫૪॥

વ્રતચારી વ્રતધરો લોકબન્ધુરલઙ્કૃતઃ ।
અલઙ્કારાક્ષરો વેદ્યો વિદ્યાવાન્ વિદિતાશયઃ ॥ ૫૫॥

આકારો ભૂષણો ભૂષ્યો ભૂષ્ણુર્ભુવનપૂજિતઃ ।
ચક્રપાણિર્ધ્વજધરઃ સુરેશો લોકવત્સલઃ ॥ ૫૬॥

વાગ્મિપતિર્મહાબાહુઃ પ્રકૃતિર્વિકૃતિર્ગુણઃ ।
અન્ધકારાપહઃ શ્રેષ્ઠો યુગાવર્તો યુગાદિકૃત્ ॥ ૫૭॥

અપ્રમેયઃ સદાયોગી નિરહઙ્કાર ઈશ્વરઃ ।
શુભપ્રદઃ શુભઃ શાસ્તા શુભકર્મા શુભપ્રદઃ ॥ ૫૮॥

સત્યવાન્ શ્રુતિમાનુચ્ચૈર્નકારો વૃદ્ધિદોઽનલઃ ।
બલભૃદ્બલદો બન્ધુર્મતિમાન્ બલિનાં વરઃ ॥ ૫૯॥

અનઙ્ગો નાગરાજેન્દ્રઃ પદ્મયોનિર્ગણેશ્વરઃ ।
સંવત્સર ઋતુર્નેતા કાલચક્રપ્રવર્તકઃ ॥ ૬૦॥

પદ્મેક્ષણઃ પદ્મયોનિઃ પ્રભાવાનમરઃ પ્રભુઃ ।
સુમૂર્તિઃ સુમતિઃ સોમો ગોવિન્દો જગદાદિજઃ ॥ ૬૧॥

પીતવાસાઃ કૃષ્ણવાસા દિગ્વાસાસ્ત્વિન્દ્રિયાતિગઃ ।
અતીન્દ્રિયોઽનેકરૂપઃ સ્કન્દઃ પરપુરઞ્જયઃ ॥ ૬૨॥

શક્તિમાઞ્જલધૃગ્ભાસ્વાન્ મોક્ષહેતુરયોનિજઃ ।
સર્વદર્શી જિતાદર્શો દુઃસ્વપ્નાશુભનાશનઃ ॥ ૬૩॥

માઙ્ગલ્યકર્તા તરણિર્વેગવાન્ કશ્મલાપહઃ ।
સ્પષ્ટાક્ષરો મહામન્ત્રો વિશાખો યજનપ્રિયઃ ॥ ૬૪॥

વિશ્વકર્મા મહાશક્તિર્દ્યુતિરીશો વિહઙ્ગમઃ ।
વિચક્ષણો દક્ષ ઇન્દ્રઃ પ્રત્યૂષઃ પ્રિયદર્શનઃ ॥ ૬૫॥

અખિન્નો વેદનિલયો વેદવિદ્વિદિતાશયઃ ।
પ્રભાકરો જિતરિપુઃ સુજનોઽરુણસારથિઃ ॥ ૬૬॥

કુનાશી સુરતઃ સ્કન્દો મહિતોઽભિમતો ગુરુઃ ।
ગ્રહરાજો ગ્રહપતિર્ગ્રહનક્ષત્રમણ્ડલઃ ॥ ૬૭॥

ભાસ્કરઃ સતતાનન્દો નન્દનો નરવાહનઃ ।
મઙ્ગલોઽથ મઙ્ગલવાન્ માઙ્ગલ્યો મઙ્ગલાવહઃ ॥ ૬૮॥

મઙ્ગલ્યચારુચરિતઃ શીર્ણઃ સર્વવ્રતો વ્રતી ।
ચતુર્મુખઃ પદ્મમાલી પૂતાત્મા પ્રણતાર્તિહા ॥ ૬૯॥

અકિઞ્ચનઃ સતામીશો નિર્ગુણો ગુણવાઞ્છુચિઃ ।
સમ્પૂર્ણઃ પુણ્ડરીકાક્ષો વિધેયો યોગતત્પરઃ ॥ ૭૦॥

સહસ્રાંશુઃ ક્રતુમતિઃ સર્વજ્ઞઃ સુમતિઃ સુવાક્ ।
સુવાહનો માલ્યદામા કૃતાહારો હરિપ્રિયઃ ॥ ૭૧॥

બ્રહ્મા પ્રચેતાઃ પ્રથિતઃ પ્રયતાત્મા સ્થિરાત્મકઃ ।
શતવિન્દુઃ શતમુખો ગરીયાનનલપ્રભઃ ॥ ૭૨॥

ધીરો મહત્તરો વિપ્રઃ પુરાણપુરુષોત્તમઃ ।
વિદ્યારાજાધિરાજો હિ વિદ્યાવાન્ ભૂતિદઃ સ્થિતઃ ॥ ૭૩॥

અનિર્દેશ્યવપુઃ શ્રીમાન્ વિપાપ્મા બહુમઙ્ગલઃ ।

સ્વઃસ્થિતઃ સુરથઃ સ્વર્ણો મોક્ષદો બલિકેતનઃ ॥ ૭૪॥

નિર્દ્વન્દ્વો દ્વન્દ્વહા સર્ગઃ સર્વગઃ સંપ્રકાશકઃ ।
દયાલુઃ સૂક્ષ્મધીઃ ક્ષાન્તિઃ ક્ષેમાક્ષેમસ્થિતિપ્રિયઃ ॥ ૭૫॥

ભૂધરો ભૂપતિર્વક્તા પવિત્રાત્મા ત્રિલોચનઃ ।
મહાવરાહઃ પ્રિયકૃદ્દાતા ભોક્તાऽભયપ્રદઃ ॥ ૭૬॥

ચક્રવર્તી ધૃતિકરઃ સમ્પૂર્ણોऽથ મહેશ્વરઃ ।
ચતુર્વેદધરોऽચિન્ત્યો વિનિન્દ્યો વિવિધાશનઃ ॥ ૭૭॥

વિચિત્રરથ એકાકી સપ્તસપ્તિઃ પરાત્પરઃ ।
સર્વોદધિસ્થિતિકરઃ સ્થિતિસ્થેયઃ સ્થિતિપ્રિયઃ ॥ ૭૮॥

નિષ્કલઃ પુષ્કલો વિભુર્વસુમાન્ વાસવપ્રિયઃ ।
પશુમાન્ વાસવસ્વામી વસુધામા વસુપ્રદઃ ॥ ૭૯॥

બલવાન્ જ્ઞાનવાંસ્તત્ત્વમોઙ્કારસ્ત્રિષુ સંસ્થિતઃ ।
સઙ્કલ્પયોનિર્દિનકૃદ્ભગવાન્ કારણાપહઃ ॥ ૮૦॥

નીલકણ્ઠો ધનાધ્યક્ષશ્ચતુર્વેદપ્રિયંવદઃ ।
વષટ્કારોદ્ગાતા હોતા સ્વાહાકારો હુતાહુતિઃ ॥ ૮૧॥

જનાર્દનો જનાનન્દો નરો નારાયણોऽમ્બુદઃ ।
સન્દેહનાશનો વાયુર્ધન્વી સુરનમસ્કૃતઃ ॥ ૮૨॥

વિગ્રહી વિમલો વિન્દુર્વિશોકો વિમલદ્યુતિઃ ।
દ્યુતિમાન્ દ્યોતનો વિદ્યુદ્વિદ્યાવાન્ વિદિતો બલી ॥ ૮૩॥

ઘર્મદો હિમદો હાસઃ કૃષ્ણવર્ત્મા સુતાજિતઃ ।
સાવિત્રીભાવિતો રાજા વિશ્વામિત્રો ઘૃણિર્વિરાટ્ ॥ ૮૪॥

સપ્તાર્ચિઃ સપ્તતુરગઃ સપ્તલોકનમસ્કૃતઃ ।
સમ્પૂર્ણોऽથ જગન્નાથઃ સુમનાઃ શોભનપ્રિયઃ ॥ ૮૫॥

સર્વાત્મા સર્વકૃત્ સૃષ્ટિઃ સપ્તિમાન્ સપ્તમીપ્રિયઃ ।
સુમેધા મેધિકો મેધ્યો મેધાવી મધુસૂદનઃ ॥ ૮૬॥

અઙ્ગિરઃપતિઃ કાલજ્ઞો ધૂમકેતુઃ સુકેતનઃ ।
સુખી સુખપ્રદઃ સૌખ્યં કામી કાન્તિપ્રિયો મુનિઃ ॥ ૮૭॥ સૌખ્યં કાન્તિઃ

સન્તાપનઃ સન્તપન આતપસ્તપસાં પતિઃ ।
ઉમાપતિઃ સહસ્રાંશુઃ પ્રિયકારી પ્રિયઙ્કરઃ ॥ ૮૮॥

પ્રીતિર્વિમન્યુરમ્ભોત્થઃ ખઞ્જનો જગતાં પતિઃ ।
જગત્પિતા પ્રીતમનાઃ સર્વઃ ખર્વો ગુહોઽચલઃ ॥ ૮૯॥

સર્વગો જગદાનન્દો જગન્નેતા સુરારિહા ।
શ્રેયઃ શ્રેયસ્કરો જ્યાયાન્ મહાનુત્તમ ઉદ્ભવઃ ॥ ૯૦॥

ઉત્તમો મેરુમેયોઽથ ધરણો ધરણીધરઃ ।
ધરાધ્યક્ષો ધર્મરાજો ધર્માધર્મપ્રવર્તકઃ ॥ ૯૧॥

રથાધ્યક્ષો રથગતિસ્તરુણસ્તનિતોઽનલઃ ।
ઉત્તરોઽનુત્તરસ્તાપી અવાક્પતિરપાં પતિઃ ॥ ૯૨॥

પુણ્યસઙ્કીર્તનઃ પુણ્યો હેતુર્લોકત્રયાશ્રયઃ ।
સ્વર્ભાનુર્વિગતાનન્દો વિશિષ્ટોત્કૃષ્ટકર્મકૃત્ ॥ ૯૩॥

વ્યાધિપ્રણાશનઃ ક્ષેમઃ શૂરઃ સર્વજિતાં વરઃ ।
એકરથો રથાધીશઃ પિતા શનૈશ્ચરસ્ય હિ ॥ ૯૪॥

વૈવસ્વતગુરુર્મૃત્યુર્ધર્મનિત્યો મહાવ્રતઃ ।
પ્રલમ્બહારાસઞ્ચારી પ્રદ્યોતો દ્યોતિતાનલઃ ॥ ૯૫॥

સન્તાપહૃત્ પરો મન્ત્રો મન્ત્રમૂર્તિર્મહાબલઃ ।
શ્રેષ્ઠાત્મા સુપ્રિયઃ શમ્ભુર્મરુતામીશ્વરેશ્વરઃ ॥ ૯૬॥

સંસારગતિવિચ્છેત્તા સંસારાર્ણવતારકઃ ।
સપ્તજિહ્વઃ સહસ્રાર્ચી રત્નગર્ભોઽપરાજિતઃ ॥ ૯૭॥

ધર્મકેતુરમેયાત્મા ધર્માધર્મવરપ્રદઃ ।
લોકસાક્ષી લોકગુરુર્લોકેશશ્ચણ્ડવાહનઃ ॥ ૯૮॥

ધર્મયૂપો યૂપવૃક્ષો ધનુષ્પાણિર્ધનુર્ધરઃ ।
પિનાકધૃઙ્મહોત્સાહો મહામાયો મહાશનઃ ॥ ૯૯॥

વીરઃ શક્તિમતાં શ્રેષ્ઠઃ સર્વશસ્ત્રભૃતાં વરઃ ।
જ્ઞાનગમ્યો દુરારાધ્યો લોહિતાઙ્ગો વિવર્ધનઃ ॥ ૧૦૦॥

ખગોઽન્ધો ધર્મદો નિત્યો ધર્મકૃચ્ચિત્રવિક્રમઃ ।
ભગવાનાત્મવાન્ મન્ત્રસ્ત્ર્યક્ષરો નીલલોહિતઃ ॥ ૧૦૧॥

એકોઽનેકસ્ત્રયી કાલઃ સવિતા સમિતિઞ્જયઃ ।
શાર્ઙ્ગધન્વાઽનલો ભીમઃ સર્વપ્રહરણાયુધઃ ॥ ૧૦૨॥

સુકર્મા પરમેષ્ઠી ચ નાકપાલી દિવિસ્થિતઃ ।
વદાન્યો વાસુકિર્વૈદ્ય આત્રેયોઽથ પરાક્રમઃ ॥ ૧૦૩॥

દ્વાપરઃ પરમોદારઃ પરમો બ્રહ્મચર્યવાન્ ।
ઉદીચ્યવેષો મુકુટી પદ્મહસ્તો હિમાંશુભૃત્ ॥ ૧૦૪॥

સિતઃ પ્રસન્નવદનઃ પદ્મોદરનિભાનનઃ ।
સાયં દિવા દિવ્યવપુરનિર્દેશ્યો મહાલયઃ ॥ ૧૦૫॥

મહારથો મહાનીશઃ શેષઃ સત્ત્વરજસ્તમઃ ।
ધૃતાતપત્રપ્રતિમો વિમર્ષી નિર્ણયઃ સ્થિતઃ ॥ ૧૦૬॥

અહિંસકઃ શુદ્ધમતિરદ્વિતીયો વિવર્ધનઃ ।
સર્વદો ધનદો મોક્ષો વિહારી બહુદાયકઃ ॥ ૧૦૭॥

ચારુરાત્રિહરો નાથો ભગવાન્ સર્વગોઽવ્યયઃ ।
મનોહરવપુઃ શુભ્રઃ શોભનઃ સુપ્રભાવનઃ ॥ ૧૦૮॥

સુપ્રભાવઃ સુપ્રતાપઃ સુનેત્રો દિગ્વિદિક્પતિઃ ।
રાજ્ઞીપ્રિયઃ શબ્દકરો ગ્રહેશસ્તિમિરાપહઃ ॥ ૧૦૯॥

સૈંહિકેયરિપુર્દેવો વરદો વરનાયકઃ ।
ચતુર્ભુજો મહાયોગી યોગીશ્વરપતિસ્તથા ॥ ૧૧૦॥

અનાદિરૂપોઽદિતિજો રત્નકાન્તિઃ પ્રભામયઃ ।
જગત્પ્રદીપો વિસ્તીર્ણો મહાવિસ્તીર્ણમણ્ડલઃ ॥ ૧૧૧॥

એકચક્રરથઃ સ્વર્ણરથઃ સ્વર્ણશરીરધૃક્ ।
નિરાલમ્બો ગગનગો ધર્મકર્મપ્રભાવકૃત્ ॥ ૧૧૨॥

ધર્માત્મા કર્મણાં સાક્ષી પ્રત્યક્ષઃ પરમેશ્વરઃ ।
મેરુસેવી સુમેધાવી મેરુરક્ષાકરો મહાન્ ॥ ૧૧૩॥

આધારભૂતો રતિમાંસ્તથા ચ ધનધાન્યકૃત્ ।
પાપસન્તાપહર્તા ચ મનોવાઞ્છિતદાયકઃ ॥ ૧૧૪॥

રોગહર્તા રાજ્યદાયી રમણીયગુણોઽનૃણી ।

કાલત્રયાનન્તરૂપો મુનિવૃન્દનમસ્કૃતઃ ॥ ૧૧૫॥

સન્ધ્યારાગકરઃ સિદ્ધઃ સન્ધ્યાવન્દનવન્દિતઃ ।
સામ્રાજ્યદાનનિરતઃ સમારાધનતોષવાન્ ॥ ૧૧૬॥

ભક્તદુઃખક્ષયકરો ભવસાગરતારકઃ
ભયાપહર્તા ભગવાનપ્રમેયપરાક્રમઃ ।
મનુસ્વામી મનુપતિર્માન્યો મન્વન્તરાધિપઃ ॥ ૧૧૭॥

ફલશ્રુતિઃ
એતત્તે સર્વમાખ્યાતં યન્માં ત્વં પરિપૃચ્છસિ ।
નામ્નાં સહસ્રં સવિતુઃ પારાશર્યો યદાહ મે ॥ ૧॥

ધન્યં યશસ્યમાયુષ્યં દુઃખદુઃસ્વપ્નનાશનમ્ ।
બન્ધમોક્ષકરં ચૈવ ભાનોર્નામાનુકીર્તનાત્ ॥ ૨॥

યસ્ત્વિદં શ‍ૃણુયાન્નિત્યં પઠેદ્વા પ્રયતો નરઃ ।
અક્ષયં સુખમન્નાદ્યં ભવેત્તસ્યોપસાધિતમ્ ॥ ૩॥

નૃપાગ્નિતસ્કરભયં વ્યાધિતો ન ભયં ભવેત્ ।
વિજયી ચ ભવેન્નિત્યમાશ્રયં પરમાપ્નુયાત્ ॥ ૪॥

કીર્તિમાન્ સુભગો વિદ્વાન્ સ સુખી પ્રિયદર્શનઃ ।
જીવેદ્વર્ષશતાયુશ્ચ સર્વવ્યાધિવિવર્જિતઃ ॥ ૫॥

નામ્નાં સહસ્રમિદમંશુમતઃ પઠેદ્યઃ
પ્રાતઃ શુચિર્નિયમવાન્ સુસમૃદ્ધિયુક્તઃ ।
દૂરેણ તં પરિહરન્તિ સદૈવ રોગાઃ
ભૂતાઃ સુપર્ણમિવ સર્વમહોરગેન્દ્રાઃ ॥ ૬॥

॥ ઇતિ શ્રી ભવિષ્યપુરાણે સપ્તમકલ્પે
શ્રીભગવત્સૂર્યસ્ય સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Originally encoded and proofread by
Kirk Wortman kirkwort at hotmail.com from Shaktapramod
Revised by PSA Easwaran from Gita press to avoid errors.

*Shri Surya Sahasranama Stotram 1*

pdf was typeset on June 7, 2020

Please send corrections to *sanskrit@cheerful.com*